
HamsSoU. **हंसषोढोपनिषत्** Page. Line.

अथाह वै हंसषोढान्यासी शिवो भवेत् । सर्वसिद्धीश्वरो भवेत् । एतत्फलं वक्तुं सदाशिवोऽपि न समर्थः । षोढान्यासस्य विरूपाक्षमहाकाल ऋषिः । अनुष्टुप् छन्दः । काली देवता । कालीदेहार्थे विनियोगः । हंसेनाङ्ग-षट्कम् । स निर्वाणरूपो भवेत् । हंसः कं खं गं घं ङं महामुण्डमालाधारिणि महाकालप्रिये मां रक्ष रक्ष । षट्चक्रवासिनि वागीश्वरि जिह्वाग्रे वस । हं नमः शिरसि प्रोतं वेद शिवो भवेत् । हंसः चं छं जं झं ञं महात्रि-पुरभैरवि पुस्तकाक्षमालाधारिणि शत्रुमुखस्तम्भनं कुरु कुरु स्वाहेति महा-पद्मे । हंसः टं ठं डं ढं णं डां डीं डं डाकिनि मां रक्ष रक्ष नाहते न्यसेत् । तृतीयारूपो भवेत् । हंसः तं थं दं धं नं महामा[illegible]र म[illegible] हारिणि हुं हुं दारिद्र्यं हर हर स्वाहा । गुं न्यसेत् । स [illegible]कालीत्वं गच्छति चतुर्थत्वं गच्छति । हंसः पं फं बं भं मं मार्जारि वीरावलि म[illegible] नाशय नाशय । हंसः यं रं लं वं शं षं सं हं लम्बोदरि मातर्महामङ्गल

मम जाड्यं छेदय छेदय । भ्रंश भ्रंश । भगवति मां रक्ष रक्ष । भुवन-धारिणि मां धारय धारय । स्वाहापदद्वयं न्यस्य शिवो भवेत् । अथ वै षष्ठीं न्यसेत् । हंसः लं क्षं महालक्ष्मि राजराजेश्वरि महा-कालखण्डिनि खण्डिनि खण्डय खण्डय खां खीं खूं खैं खों खौं त्रि समे स्वाहेति सर्वाङ्गे न्यसेत् । हंसः पञ्चाशत् व्यापकं कुर्यात् । । स शिवो भवेत् । स सोमयाजी भवेत् । स विरक्तो भवेत् । क्षेतो भवेत् । सोऽमृतत्वं गच्छति । स सर्वकालत्वं गच्छति । स री भवेत् । अनधीतगतिर्विद्यां लभेत् । कर्तव्याकरणादिकर्ता र्वसिद्धीश्वरो भवेत् । कालीरूपो भवेत् । सोऽहं हंस इत्याह दाशिव इति प्रोतं वेद ॥

इत्याथर्वणे सौभाग्यकाण्डे हंसषोढोपनिषत् समाप्ता